
एकादशः पाठः

## सिंह-दिलीपयोः संवादः

CTCF1N



(महाराजः दिलीपः सिंहं हन्तंु धनुः आकृष्य सज्जः भवति।)

**सिंहः-** (उच्चैः हसन्) महीपाल! तव श्रमः वृथा। भवान् मां हन्तुं समर्थः न भविष्यति।

**दिलीपः-**भवान् कः ? किम् इच्छति ?

**सिंहः-** भगवतः शड.्करस्य सेवकः अहं कुम्भोदरः अस्मि। अहम् एतां धेनुं हनिष्यामि।


**दिलीपः-**भवान् एवं कथं वदति ?

**सिंहः-** माता पार्वती इमं देवदारुवृक्षं पुत्रवत् पालितवती। एकदा एकेन गजेन अस्य वृक्षस्य त्वक् उच्छिन्नम्। गजस्य दुष्कृतेन माता दुःखिता अभवत्। ततः प्रभृति महादेवेन एतस्य रक्षणार्थम् अहम् आदिष्टः। तदा प्रभृति अस्यां गुहायां स्थितोऽस्मि। अद्य भाग्यवशात् एषा धेनुः आगता। अतएव एतां धेनुं त्यजतु।

**दिलीपः-**कुम्भोदर! देवानां देवः महादेवः जगतः रक्षकः परिपालकश्च। परन्तु इयं गुरोः धेनुःमया निश्चयेन रक्षणीया। एतदर्थं एतां परित्यज्य मां भक्षतु।

**सिंहः**-(विहस्य) विस्तृतं साम्राज्यं, नवं यौवनं सुन्दरं शरीरं च विहाय किमर्थं भवान् एकस्याः धेनोः रक्षायैः स्व प्राणान् त्यक्तुमिच्छति। त्यजतु मूर्खत्वम्। धेनोः जीवनस्य अपेक्षया भवतां जीवनं वरम्। यतोहि भवान् जीवितश्चेत् सर्वासां प्रजानां सम्यक् पालनं भविष्यति।

**दिलीपः-**''क्षतात् त्रायते" इति क्षत्रियः कथ्यते। क्षत्रियः सन् मया धेनुः निश्चयेन रक्षणीया। क्षत्रियत्वे नष्टे सति नास्ति कि□चित् प्रयोजनं राज्येन प्राणैः वा। अतएव मम शरीरं भक्षयतु। इमां धेनुं त्यज।



**सिंहः**-भवतु, स्व शरीरं समर्पयतु।

(यावत् राजा सिंहस्य पुरतः अवनत्य स्वशरीरं समर्पयति तावत् सिंहः अन्तर्हितः भवति।)

**नन्दिनी (धेनुः)**- राजन्। मया भवान् परीक्षितः। शरणागतानां परित्राणाय भवतः, अनुपमया निष्ठया अहं नितरां प्रसन्नः। अचिरमेव ते कामना पूर्णा भविष्यति।

**हन्तुम् -** मारने के लिए। **वृथा** -व्यर्थ। **महीपाल** -राजा। **पालितवती** = पालन की। **त्वक्** =त्वचा। (पेड़ की छाल) **उच्छिन्नम्=** छील दिया। **दुष्कृतेन** = दुष्टता से। **रक्षणार्थम्** = रक्षा करने के लिए **अदिष्टः** = आदेशित किया गया। **अस्यां गुहायाम्** = इस गुफा मंें। **धेनुः** = गाय। **ममार्थं=** मेरे लिये। **त्यजतु** (त्यज्) =छोड़िए। **परिपालकः** =पालन करने वाला। **रक्षणीया=** बचाना चाहिए। **मूर्खत्वम्** =मूर्खता। **वरम्=**श्रेष्ठ। **क्षतात् त्रायते=** विपत्ति अथवा चोट से बचाता है। **क्षत्रियत्वे नष्टे सति =**क्षत्रियता के नष्ट होने पर। **कोटिशः=** करोड़ांे। दातुम् =देने के लिये। **प्रयोजनम्=** उद्देश्य। **इमां धेनुम्=** इस गाय को। अवनत्य =झुककर। **अन्तर्हितः** = अन्तर्धान हो गया। **गृहीता** =ली। **शरणागतानां परित्राणाय=** शरण में आये हुए की रक्षा के लिए। **नितराम्=** अत्यधिक। **आशिषा** =आशीर्वाद से। **आत्मानुगणं पुत्रम्=** अपने जैसा पुत्र।

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

सिंह-दिलीपयोः हनिष्यामि आत्मानुगुणम् उच्छिन्नम् दुष्कृत्या स्थितोऽस्मि परित्यज्य त्यक्तुमिच्छति जीवितश्चेत् क्षतात् क्षत्रियत्वे अन्तर्हितः

अभ्यासः

माता, पुत्रवत्, भवान्, त्यज, क्षतात्।

**2.पूर्णवाक्येन उत्तरत -**

(क) कुम्भोदरः कस्य सेवकः आसीत् ?

(ख) माता पर्वती कं वृक्षं पुत्रवत् पालितवती ?

(ग) क्षतात् कः त्रायते ?

(घ) राजा कस्य पुरतः अवनत्य स्वशरीरं समर्पयति?

**3-निम्ननलिखित पदानि निर्देशानुसारं परिवर्तयत-**

यथा सिंहः (प्रथमा बहुवचने) सिंहाः

बालकः (प्रथमा बहुवचने ) .........

वानरः (तृतीया एकवचने) .........

कुम्भोदरः (द्वितीया एकवचने) ........

गजः (षष्ठी बहुवचने) .........

**4.-वाक्यशुद्धिं कारयत-**

(क) इमं देवदारु वृक्षं पुत्रवत् पालितवती।

(ख) तावत् अस्य गुहायां स्थितोऽस्मि ।

(ग) इयं गुरोः धेनुः मया निश्चयेन रक्षणीया।

(घ) इमां धेनंु त्यज।

**5-सन्धि-विच्छेदं कुरुत-**

पदम् सन्धि-विच्छेदः

यथा- रक्षणार्थम्त्र रक्षण+अर्थम्

ममार्थम्त्र ...........

उच्छिन्नम्त्र ..........

स्थितोऽस्मित्र ..........

**6.-म×जूषातः पदानि चित्वा वाक्यानि पूरयत-**

माता पुत्रवत् भवान् त्यज क्षतात्

(क) इमं देवदारुवृक्षं...................पालितवती।

(ख) गजस्य अनया दुष्कृत्या.................अतीव दुःखिता अभवत्।

(ग) .........................मां हन्तुं सर्मथः न भविष्यति।

(घ) ............................त्रायते इति क्षत्रियः।

(ड़) इमां धेनुं..........

**7- अधोलिखितपदानि प्रयुज्य वाक्यरचनां कुरुत-**

यथा- वृक्षः- अत्र एकः आम्र वृक्षः अस्ति।

सिंहः

राजा

सेवकः

ध्यातव्यम्ह

निष्यामि-हन् धातुनां लृटलकारे उत्तम पुरुषस्य एक वचने इंद रूपं भवति। एवमेव पठिष्यामि भविष्यामि, करिष्यामि, चेत्यादीनि रूपाणि लृटलकारे भवन्ति।

शिक्षण सङ्.केतः-

छात्रैः विविध कार्यक्रमेषु अस्य नाटकस्य अभिनयं कारयत।

**एतदपि जानीत- रामायणे सप्तकाण्डानि-**

1. बालकाण्डम् 2. अयोध्याकाण्डम् 3. अरण्यकाण्डम् 4. किष्किन्धाकाण्डम् 5. सुन्दरकाण्डम् 6. युद्धकाण्डम् 7. उत्तरकाण्डम्

**रामायणं महाभारतं च आर्ष काव्य रूपेण ज्ञायेते।**